International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2022; 8(6): 192-199
© 2022 IJSR
www.anantaajournal.com
Received: 17-10-2022
Accepted: 18-11-2022

**डॉ. चक्रपाणिपोख्रेलः**
अतिथि-अध्यापकः,संस्कृतविभागे, ओडिशाकेन्द्रीयविश्वविद्यालयः कोरापुटम्, ओडिशा, भारत

**Corresponding Author:**
**डॉ. चक्रपाणिपोख्रेलः**
अतिथि-अध्यापकः,संस्कृतविभागे, ओडिशाकेन्द्रीयविश्वविद्यालयः कोरापुटम्, ओडिशा, भारत

# प्राङ्नव्यवैयाकरणनयसम्मतकर्तृकारकमीमांसा

## डॉ. चक्रपाणिपोख्रेलः

**सारांशः**
अस्मिन् हि संसारे अर्थबोधाय व्यवहाराय बह्वीः भाषाः प्रयुञ्जते। तत्रापि वर्णपदवाक्यानां व्यवस्थापनं दृश्यत एव। अर्थबोधः वाक्येनैव भवति सर्वं वाक्यं क्रियया परिसमाप्यते इति नियमेन। वाक्यञ्च एकतिङन्तार्थविशेष्यकबोधजनकत्वम्। अथ च वाक्यनिष्पत्तये कारकाणाम् आवश्यकं भवति कारकं हि क्रियाजनकत्वम्। तच्च षड्विधं कर्तृकर्मकरणसम्प्रदानापादानाधिकरणेत्यादिना। एतेषु एव प्रथमादिविभक्तीनां विधानं भवति। अत्रैषा शंका जागर्तितराम् अत्र प्रथमायाः विभक्तेः कारके इति सूत्राधिकारे अपठितत्वेऽपि कथं कारकत्वेन व्यवहारः भवति इति जिज्ञासायाः शान्त्यर्थं मया काचन युक्तयः प्रमाणानि च प्रस्तुतानि सन्ति प्रथमाविभक्तेः कारक्तसिद्धये। अन्ते च प्रथमायाः कारकत्वं निर्णीतमस्ति अस्मिन् शोधनिबन्धे।

**कूटशब्दाः-** व्यापारः,कर्ता, कारकम्, पदम्, शब्दत्वम्, कर्तृनिष्ठम् इत्यादयः

**प्रस्तावनाः**
अपदं न प्रयुञ्जीत इति वैयाकरणानां नियमानुसारं हि वैयाकरणैः व्यवहारार्थमात्मोद्धारार्थञ्च पदानां तत्रापि सुपदानां प्रयोगे सावधानता भाव्यते । अत्र हि मतमस्ति वैयाकरणानां "एकः शब्दःसुप्रयुक्तः (ज्ञानपूर्वक प्रयोगे तात्पर्यम्) स्वर्गे लोके च कामधुग्भवतीति" ।

अत्र भवति सहजा जिज्ञासा किं तत् पदम् इति । अत्र पाणिनिः सुप्तिङन्तं पदम्[1] अर्थ शास्त्रे वर्णसंघातः पदम्[2] इत्युक्तम् अस्ति। तत्रैव पुनः ऋग्वेदसंहितायां नामाख्यातोपसर्ग–निपातरुपाणि चत्वारि वाक्परिमितानि निर्दिष्टानि सन्ति। एतेषु मतेषु शब्दतत्वविचारणायां पाणिनीयं मतं सर्वमान्यं दृश्यते। सुबन्तं तिङन्तञ्च पदसंज्ञं भवतीति। तत्र सुबन्तं नाम सुपः प्रत्ययाः अन्ते यस्य तत् सुबन्तम्। सुपश्च यथा स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्य-स्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप्[3] इति एकविंशतिसंख्यकाः। एते त्रयस्त्रिका विभिन्नासु विभक्तिषु विविधेषु कारकेषु विभज्यन्ते कर्मणि द्वितीया[4] कर्तृकरणयोस्तृतीय[5] इत्यादि सूत्रबलेन। तत्र हि सामान्यतया वैयाकरणैः क्रियान्वयित्वं कारकत्वमिति स्वीक्रियते। कारकाणां व्याख्यानसन्दर्भे वैयाकरणानां सन्ति बह्व्यः व्याख्याः। तत्र श्रीमता नागेशेन स्वस्य परमलघुमञ्जूषायां सुबर्थस्य व्याख्यानं यथा विहितमस्ति तस्य सम्यगध्ययनं विधीयते।

**कारकम्**

तत्र सुबर्थस्याध्ययनावसरे सर्वप्रथमं सुबर्थः क इति सुबर्थविषयिणी जिज्ञासा समुदेति। तत्र सुपो लक्षणं यथोक्तम्-

प्रकृत्यर्थे स्वार्थसंख्यान्वयापि हेतवः सुपः ।
प्रथमादिभेदेन ताश्च सप्तविधाः मताः।।[6]

इत्थञ्च प्रकृत्यर्थधार्मिकस्वार्थसंख्याप्रकारान्वयबोधजनकत्वं सुब्विभक्तित्वम्। सुब्विभक्तयश्च प्रथमाद्वितीयादयः सप्त। व्याकरणशास्त्रे सामान्यतया विभक्तिः द्विधा प्रोक्ता– कारकविभक्तिः उपपदविभक्तिश्चेति। तथा च धात्वर्थांशप्रकारो यः सुबर्थः सोऽत्र कारकत्वम्।[7] तत्र हि कारके इति सूत्रे भाष्यम् करोतीति कारकम् तत्रैव भाष्ये करोति क्रियां निवर्तयतीत्यर्थो भवति तस्य । तत्र हि ङ्याप्प्रातिपादिकात्[8] इत्यधिकृत्य विहिताः स्वादिप्रत्ययाः गृह्यन्ते। तत्र कारकाणि यथा प्रस्तुतानि सन्ति नागेशेन-

कर्ता कर्म करणं सम्प्रदानं तथैव च ।
अपादानाधिकरणमित्याहुः कारकाणि षट् ।।[9] इति।।

षष्ठ्यर्थः कारकत्वेन न गृह्यते यतो हि तत्रोक्तम्

"षष्ठ्यर्थस्तु सम्बन्धो न धात्वर्थे प्रकारीभूय भासते तण्डुलस्य पचतीत्याद्यप्रयोगात् अतः सम्बन्धो न कारकम्" इति।[10]

लघुशब्देन्दुशेखरस्य कारकप्रकरणे षष्ठ्याः कारकत्वाभावः नागेशेनापि प्रतिपादितो वर्तते यथा– ब्राह्मणस्य पुत्रं पन्थानं पृच्छति इत्यादौ ब्राह्मणस्य न कारकत्वं पुत्रेण अन्यथासिद्धत्वाभावात् इति।[11]

इत्थञ्चात्र कारकपदेन पूर्वोक्तानां कर्तृकर्मादीनामेव षण्णां ग्रहणं भवति न तु सम्बन्धस्यापि। षष्ठ्याः कारकभिन्नत्वं हि षष्ठी शेषे" [12] इति सूत्रेण एव निर्दिश्यते पाणिनिना अपादानादिकारकप्रातिपदिकार्थातिरिक्ते स्वस्वामिभावादिरुपशेषे षष्ठी भवति इति सूत्रस्यास्य अर्थः। तत्र परमलघुमञ्जूषायां नागेशो यथा कारकप्रातिपदिकार्थव्यतिरिक्तः स्वस्वामिभावादिसम्बन्धः षष्ठ्याःवाच्यः।[13] इत्थञ्चात्र कारकपदेन षण्णां ग्रहणं भवतीति सिद्धम्। तत्र कारकं नाम किम् इति प्रश्ने भाष्यकारः करोतीति कारकम्[14] इति प्रतिपादयति। तत्रैव भट्टोजिदीक्षितः क्रियान्वयित्वं कारकत्वमिति" प्रतिपादयति।नागेशः परमलघुमञ्जूषायामित्थं कारकस्य लक्षणं प्रस्तौति तत्र क्रियानिष्पादकत्वं कारकत्वम्।[15] क्रियानिष्पादकत्वमित्यस्य क्रिया निवर्तकत्वम् क्रियाजनकत्वम् क्रियोत्पादकत्वं वा अर्थः। तत्र महत्याः संज्ञायाः विधानादन्वर्थसंज्ञा विज्ञायेत करोतीति कारकमिति व्याख्यातं प्राप्यते महाभाष्ये। निष्कर्षतः कारकस्य लक्षणमिदं भवति यथा धातुवाच्यव्यापारोत्पत्त्यनुकूलव्यापारवत्वं कारकत्वमिति।" तथा च धातुवाच्यव्यापारोत्पत्तौ यस्य व्यापारस्यानुकूल्यं भवति तत्कारकं भवति । ब्राह्मणस्य पुत्रं पन्थानं पृच्छतीत्यादौ तु पुत्रनिष्ठव्यापारस्यैव धातुवाच्यव्यापारोत्पत्तौ आनुकूल्यं वर्तत इति पुत्रेण अन्यथासिद्ध्या ब्राह्मणस्य न कारकत्वम् ।

**कर्तृकारकम् (प्रथमा विभक्तिः)**

तत्र पूर्वोक्तेषु षट्सु कारकेषु प्रथमं प्रधानञ्च भवति कर्तृकारकम्। कर्तुः स्वरुपं प्रतिपादयता पाणिनिना सूत्रितम् स्वतन्त्रः कर्ता[16] अस्य सूत्रस्य अयमर्थः क्रियायां स्वतन्त्ररुपेण विवक्षितोऽर्थः कर्तृसंज्ञको भवतीति। स्वतन्त्रशब्दे बहुव्रीहिसमासोऽपेक्षितः स्व आत्मा तन्त्रं प्रधानमस्येति विग्रहः। अत्र कैयटो यथा & "स्वशब्द आत्मावाची स्व आत्मा तन्त्रं प्रधानं यस्य स्वतन्त्र उच्यते"[17] तत्र हि सूत्रे तन्त्रशब्दस्य प्रधानमित्यर्थो भाष्यकारेणापि स्वीकृतम्। एवञ्च स्वातन्त्र्यं नाम प्रधानीभूतधात्वर्थाश्रयत्वम्। इदञ्च नागेशेन परमलघुमञ्जूषायामित्थमुक्तं तत्र प्रकृतधातुवाच्यव्यापाराश्रयत्वं कर्तृत्वम्।[18]

अत्र एका शंका जागर्त्येषा तत्र कर्मणि प्रत्यये देवदत्तेन ओदनः पच्यते इत्यत्र नव्यनये फलविशेष्यक–शाब्दबोधस्वीकारात् देवदत्तनिष्ठव्यापारस्य प्राधान्याभावो भवति। तत्र देवदत्तस्य देवदत्तनिष्ठव्यापारस्य प्रधान्याभावस्य सत्वात् कथं कर्तृत्वमिति। अस्य परिहारो लघुशब्देन्दुशेखरे नागेशेनेत्थं विहितं वर्तते। यथा– स्वातन्त्र्यञ्च कर्तृप्रत्ययसमभिव्याहारे प्रधानीभूतधात्वर्थाश्रयत्वम्। पक्वस्तण्डुलो देवदत्तेन इत्यत्र फलस्य प्राधान्येऽपि देवदत्तस्य कर्तृत्वसिद्धये कर्तप्रत्ययसमभिव्याहारे एवञ्च देवदत्तेन ओदनः पच्यते इत्यत्र देवदत्तकर्तृकव्यापारजन्यैकत्वावच्छिन्नौदनाभिन्नकर्मनिष्ठविक्लित्तिरिति बोधो भवति। तथा च न दोषः कर्तृप्रत्ययसमभिव्याहारे इति पदस्य निवेशनात् ।

कर्तृप्रत्ययसमभिव्याहारे इति पदनिवेशनपूर्वकं देवदत्तेन ओदनः पच्यते इत्यादौ देवदत्ते कर्तृसिद्धावपि पाचयत्योदनं देवदत्तेन यज्ञदत्तः" इत्यादौ कर्तृप्रत्ययसमभिव्याहारे प्रकृतणिजन्तधातुवाच्यव्यापाराश्रयत्वं यज्ञदत्ते एव अस्ति न तु प्रयोज्ये देवदत्ते इति दोषस्तादवस्थ्य एव प्रतिभाति। तत्र हि णिजन्तस्थले णिच्प्रत्ययस्य द्योतकत्वेन पचिधातोः विक्लित्यनुकूलव्यापारानुकूलव्यापार इत्यर्थो भवति। प्रयोज्यव्यापारस्तु प्रयोजकव्यापारे प्रकारतया अन्वेति प्रकारभूतव्यापाराश्रयत्वं देवदत्ते वर्तते स च प्रकारो न मुख्यः इति कथं तत्र कर्तृत्वेन तृतीया स्यात् इति शंका। अस्य परिहारस्तु शाब्दिकनिकाये इत्थं विधीयते यथा णिजन्तस्थले णिच्प्रत्ययो वाचको भवति न द्योतकः । एवञ्च णिजन्तस्य प्रकृतिभूतो यः पच्धातुः स प्रकृतधातुः, तद्वाच्यो व्यापारो विक्लित्यनुकूलो व्यापारः, तदाश्रयतया प्रयोज्यस्यापि कर्तृत्वम्। एवञ्च णिजन्ते प्रकृतधातुः पाचि धातुः पाचिधातुवाच्यो व्यापारो विक्लित्यनुकूल–व्यापारानुकूलव्यापारः, तस्याश्रयत्वेन यज्ञदत्तस्य कर्तृत्वम्। एतस्मिन् विषये नागेशो यथा "णिचस्तु वाचकत्वमेव। अतस्तत्र ण्यन्तधातुः, तत्प्रकृतिधातुः, एतदुभयवाच्यव्यापारयोः स्वार्थं प्रति प्राधान्यात् देवदत्तेन यज्ञदत्तः पाचयति" इत्यादौ प्रयोज्यव्यापाराश्रयस्यापि कर्तृत्वसिद्धिः । द्योतकत्वे तु नैतत् सिद्ध्येत्।[19]

अत्र केचन करणतृतीययैव कार्यनिर्वाहे शक्ये कर्तृत्वसिद्धये किमर्थं प्रयासः इति वदन्ति। तत्र हि प्रयोज्यस्य करणत्वविवक्षायामपि अकर्तर्यृणे पञ्चमी" इत्यनेन देवदत्तः शतेन बन्धयतीत्यादौ प्राप्तां पञ्चमीं बाधित्वा कर्तृत्वप्रयुक्ततृतीयार्थं कर्तृसंज्ञाया आवश्यकत्वात् ।

अथ च कर्तृत्वप्रयोजकं स्वातन्त्र्यञ्च विवक्षाधीनं भवति। अतः स्थाली पचति, काष्ठानि पचन्ति इत्यादौ स्थाल्यादीनां वस्तुतः स्वातन्त्र्याभावेऽपि स्वातन्त्र्येण विवक्षितत्वात् कर्तृसंज्ञा। अत एव स्वतन्त्रः कर्ता इत्यस्य वृत्तौ विवक्षितोऽर्थः कर्ता स्यात् इति उक्तमस्ति । एवमेव ओदनः स्वयमेव पच्यते इत्यादौ कर्मकर्तरि प्रधानीभूतधात्वर्थफलाश्रयत्वेन कर्तृत्वं बोध्यम्। एवञ्च कर्तुः स्वातन्त्र्ये भर्तृहरिणेत्थं प्रतिपादितं यथा–

प्रागन्यतः शक्तिलाभात् न्यग्भावापादानादपि ।
तदधीनं प्रवृत्तित्वात् प्रवृत्तानां निर्वत्तनात् ।।
अदृष्टत्वात् प्रतिनिधेः प्रविवेके च दर्शनात् ।
आरादप्युपकारित्वे स्वातन्त्र्यं कर्तुरिष्यते ।।[20]

तथा चान्येषां कारकाणां कर्त्रधीनप्रवृत्तिनिवृत्तिकत्वेन स्वेच्छाधीनप्रवृत्तिनिवृत्तिकत्वरुप स्वातन्त्र्यस्वीकारे कर्तुः वैयाकरणानां सम्मतिः। तत्र नागशेन प्रस्तुतं प्रकृतधातुवाच्यव्यापाराश्रयत्वं कर्तृत्वमिति लक्षणं हरि–उक्तिना धातुनोक्तक्रिये नित्यं कारके कर्तृतेष्यते संगच्छते। एवञ्चान्यकारकनिष्ठो व्यापारस्तु प्रकृतधातुवाच्यो न भवति। अन्यकारकनिष्ठो व्यापारः प्रकृतधातुवाच्यो न भवति इत्यत्र कारके इति सूत्रस्य भाष्यमेव प्रमाणमस्ति। यतोहि तत्र भाष्ये "स्थालीस्थे यत्ने (पचिना) कथ्यमाने स्थाली स्वतन्त्रा कर्तृस्थे यत्ने कथ्यमाने परतन्त्रा" इत्युक्तमस्ति । तत्र हि कारके इति सूत्रस्थं भाष्यम् सम्यग्विविच्येदं वक्तुं शक्यते यत् कारकचक्रप्रयोजकत्वं कर्तृत्वमिति कर्तृत्वस्य लक्षणान्तरम्। तत्र कर्तुः प्राधान्यन्तु यत् सर्वेषु साधनेषु सन्निहितेषु कर्ता प्रवर्तयिता भवतीति तेन ज्ञायते कर्तुः प्राधान्यम्। स्थाली पचतीत्यादौ तु कारकान्तरप्रवर्तकत्वस्यारोपान्निर्वाह इति तत्र भाष्योद्योते स्पष्टमस्ति ।

### कर्तृभेदाः

आचार्येण कौण्डभट्टेन कर्तुः भेदत्रयं स्वीकृतं वर्तते । यथा-(क)शुद्धः (ख)प्रयोजको हेतुः (ग)कर्म कर्ता ।

यथा रामो गच्छतीत्यत्र रामः शुद्धः कर्ता यज्ञदत्तः पाचयतीत्यत्र यज्ञदत्तः प्रयोजक कर्ता देवदत्तो यज्ञदत्तं गमयतीत्यत्र यज्ञदत्तादेः कर्मकर्तृत्वञ्च। अयं पक्षः परमलघुमञ्जूषाकारणेत्थं प्रस्तुतोऽस्ति यथा सूत्रमते तु कर्तृकर्माद्यर्थकप्रत्ययेन कर्त्रादिरुक्तत्वात्" [21] इत्थञ्च वैयाकरणनिकाये कर्तुः त्रयो भेदाः स्वीकृताः दृश्यन्ते । परन्तु अग्निपुराणे कर्तुः पञ्चविधत्वं प्रदर्शितमस्ति । यथा -

(क) स्वतन्त्रकर्ता। (ख) हेतुकर्ता।(ग) कर्मकर्ता।(घ) अभिहितकर्ता। (ङ) अनभिहितकर्ता।

अस्मिन् विषये द्रष्टव्यम् (अग्निपुराण पृ.२३८) एतेषु अग्निपुराणोक्तपञ्चविधसु स्वतन्त्रकर्तुः व्याख्यानं पूर्वमेव विहितम् इतोऽनन्तरम् अग्निपुराणोक्तानामन्येषां कर्तृणां विवेचनं क्रियते।

### हेतुकर्ता

तत्र हि तत्प्रयाजको हेतुश्च" [22] इति अस्ति हेतुकर्तृसंज्ञाविधायकं सूत्रम्। प्रयोज्यस्य स्वातन्त्र्यसाधनाधिकरणात्। अस्य चार्थो भवति स्वतन्त्रप्रयोजको हेतुसंज्ञ इति। अत्रैव भाष्यकारस्तु स्वतन्त्रस्य कर्तृसंज्ञायां हेतुमत्युपसंख्यानं कर्तव्यमिति"। नागेशेन हेतुमतः पदस्य प्रयोज्यमित्यर्थो विहितः। यथा कर्तृसन्निधौ प्रयोज्यस्य पारतन्त्र्यं स्वातन्त्र्याभावात् कर्तृसंज्ञाया अप्रसंगात् पाचयत्योदनं देवदत्तेनेति कर्तृतृतीया न प्राप्नोति। हेतुमच्छब्देन प्रयोजकव्यापार इत्युच्यते।

अयमेव हेतुमच्छब्देन विवक्षितोऽर्थः स्वातन्त्र्यमिति उद्भूतमिति शेषः।

हेतुमति च[23] इत्यत्र हेतुमत्पदं प्रयोज्यव्यापारपरमेवेति लघुब्देन्दुशेखरे नागेशमतं द्रष्टव्यम्। हेतुप्रयोजको विवक्ष्यते यस्येत्यर्थे मतुपो विधानात् । एवञ्च प्रयोज्यव्यापाररुपे हेतुमति द्योत्ये णिजित्यर्थो भवति। भूषणसारे तु तत्प्रयोजको हेतुश्च इत्यस्मिन् सूत्रे हेतुसंज्ञा कर्तृसंज्ञा च भवति इत्यर्थो विहितः। तत्र हि हेतुमति द्योत्ये इत्यर्थकरणेन णिचो द्योतकत्वे स्वीकृते प्रयोज्यकर्तुः स्वातन्त्र्याभवात् कर्तृसंज्ञैव न स्यात्। अतो णिचो वाचकत्वं स्वीक्रियते इति पूर्वमेव प्रतिपादितं वर्तते। णिचो वाचकत्वस्वीकारात् तथा च कार्ये प्रवृत्ते एव प्रेरणायाः विषयत्वात् कार्यं कर्तुमकर्तुं वा प्रयोज्यकर्तुः स्वातन्त्र्यस्य सत्वात् प्रयोज्यव्यापाराश्रयस्य स्वतन्त्रः कर्ता" इत्यनेन एव कर्तृसंज्ञा। प्रयोज्यकर्तुः प्रयोजकस्य च तत्प्रयोजको हेतुश्च" इत्यनेन सूत्रेण कर्तृसंज्ञा भवतीति णिजन्तप्रकृतिकः धातोः निर्वाहकव्यापारः स्वीक्रियते । तथा च गदाधरभट्टाचार्यैः तत्र स्वतन्त्रकर्तृप्रेरणा अन्यनिष्ठकर्तृत्वनिर्वाहपरा इति प्रतिपादयति। तत्र कर्तृत्वञ्च क्वचित्प्रयत्नः क्वचिद् आश्रयत्वादिकं यादृशधातूत्तराख्येन यादृशकर्तृत्वं बोध्यते तदुत्तरणिच्प्रत्ययेन तादृशकर्तृत्वनिर्वाहकव्यापारो द्योत्यते। अत एव पाचयति ज्ञापयतीत्यादौ निर्वाहको व्यापारः प्रतीयते ।

### कर्मकर्ता

क्रियां प्रति यः कर्ता सः ण्यन्तधातुवाच्यां प्रयोजकव्यापारात्मिकां क्रियां प्रति कर्मसंज्ञकः स्यात् इत्यर्थः। गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणामणि कर्ता स णौ[24] इति सूत्रे अणौ यः कत्र्ता सः णौ कर्म इति व्याख्यानात्। यद्यपि एतस्मिन् स्थले देवदत्तो यज्ञदत्तं गमयति इत्यत्र यज्ञदत्तस्य पूर्वोक्तेन सूत्रेण कर्मसंज्ञा भवति। तया च कर्मसंज्ञया कर्तृसंज्ञायाः बाधोऽपि भवति किन्तु णिच्प्रकृतिधात्वर्थव्यापाराश्रयत्वेन तस्य कर्तृत्वलक्षणाक्रान्तत्वात् यज्ञदत्तः कर्मकर्तेति व्यवहारः।

### अभिहितकर्ता

अत्र अभिहिते प्रथमा" इति वार्तिकमेव प्रमाणम्। द्वितीयादिविभक्तौ अनभिहितेइति सूत्रस्याधिकारात् । तत्र अनभिहिते कर्मणि द्वितीया अभिहिते कर्मणि प्रथमा इत्येवमेवास्ति न तु अभिहितं कर्तृसंज्ञं भवति इत्यपि इति कथमभिहितकर्ता इति शंकाया अवसरो वर्तते। तथापि वक्तुमिदं शक्यते यद्वैयाकरणानां निकाये कारकशक्तित्वेन एका एव विवक्षिता सा च कर्तृत्वरुपा। यत्र अभिहितत्वेन कारकान्तराप्रवृत्तिः तत्र कर्तृत्वशक्तिबलात् प्रथमैव भवति। अत्र भर्तृहरिः यथा

निमित्तभेदादेकैव भिन्ना शक्तिः प्रतीयते।
षोढा कर्तृत्वमेवाहुस्तत् प्रवृत्तेर्निबन्धनम्।।[25] इति।।

अतः एव विवक्षातः कारकाणि भवन्ति इति प्रवादः संगच्छते अन्यच्च

निष्पत्तिमात्रे कर्तृत्वं सर्वत्रैवास्ति कारके ।
व्यापारभेदापेक्षायां करणादित्यसंभवः।।[26] इति।।

इति अभिहित कर्मादौ कर्तृत्वस्य सत्वात् तत्र अभिहित कर्तेति व्यवहारः । अनभिहित कर्ता अनभिहिते इति सूत्रस्य व्याख्याने उक्तमस्ति भट्टोजिदीक्षितेन अभिधानञ्च प्रायेण तिङ्कृत्तद्धितसमासैः" इति। इत्थञ्च तिङ्कृत्तद्धितसमासैरनुक्ते कर्मादयो विभक्तयो भवन्ति। अपदं न प्रयुञ्जीतः इति नियमानुसारं पदमेव प्रयोगार्हम्। पदञ्च सुप्तिङन्तमेव भवति। अतः विभक्तिप्रयोगानर्हेषु अव्ययेषु प्रथमाविभक्तिमुत्पाद्य लोपयन्ति वैयाकरणाः। उक्तवैयाकरणसिद्धान्तानुशीलनेन अभिहिते कारके प्रथमा भवति । अतोऽनभिहिते इति सूत्रस्याधिकारे कर्तृकरणयोः तृतीया इति सूत्रं पठितम्। तदर्थश्च अनुक्ते कर्तरि तृतीयेति नागेशेनापि अनुक्तकर्तादिषु तृतीया भवतीति व्याख्यातम्। इत्थं कर्तृत्वस्य पञ्चविधत्वे व्याख्यातेऽपि वस्तुतः वैयाकरणनिकाये कर्तुः द्वैविध्यमेव स्वीकृतमस्ति । प्रथमःस्वतन्त्रः कर्ता इति सूत्रेण प्रतिपादितः कर्ता द्वितीयस्तत्प्रयोजको हेतुश्च" इति सूत्रेण प्रतिपादितः कर्ता। अयं भेदो जीवगोस्वामिमहोदयैः हरिनामामृतवृतौ यथा व्याख्यातः–

यस्यैव व्यापारतया क्रिया विवक्षते तत्स्वतन्त्रं तच्च तस्यापि प्रेरकतया तत् प्रयोजकं तच्च कारकं कर्तृसंज्ञं स्यात् इति।[27]

एवञ्च स्वतन्त्र कर्ता त्रिविधः–

(क) अभिहितः। (ख) अनभिहितः। (ग) कर्मकर्ता ।

देवदत्तः पचति देवदत्तेन गम्यते तृतीयस्तु यत्र कर्मण एव कर्तृत्वेन विवक्षा भवति तत्र भवति ओदनः पच्यत इति । प्रयोजकरुपो हेतुकर्ता च द्विविधः – चेतनरुपः, अचेतनरुपः। पाचयत्योदनं गोपेन कृष्णः भिक्षा वासयति इत्यादौ पूर्वत्र चेतनकर्ता अपरत्र अचेतनकर्ता चेति ।

### प्रथमाविभक्तेरध्ययनम्-

प्रातिपदिकार्थलिङ्गपरिणामवचनमात्रे प्रथमा इति सूत्रानुशासनबलात् प्रातिपदिकार्थ एव प्रथमाया अर्थः।अस्य सूत्रस्य समासादिकमित्थं कर्तुं शक्यते यथा प्रातिपदिकस्य अर्थः प्रातिपदिकार्थः तत्रापि प्रातिपदिकपदस्य विग्रह इत्थं

कर्तुं शक्यते पदं पदं प्रतिपदम् प्रतिपदमर्हतीति प्रातिपदिकम् तस्यार्थः प्रातिपदिकार्थः इति षष्ठीतत्पुरुषसमासः। प्रातिपदिकार्थश्च लिंगश्च परिमाणश्च वचनश्च प्रातिपदिकार्थलिङ्गपरिमाणवचनं समाहारद्वन्द्वः प्रातिपदिकार्थलिंगपरिमाणवचनञ्च अदः मात्रञ्च प्रातिपदिकार्थलिंगपरिमाणवचनमात्रं तस्मिन् प्रातिपदिकार्थलिंगपरिमाणवचनमात्रे कर्मधारयतत्पुरुषः द्वन्द्वादौ द्वन्द्वमध्ये द्वन्द्वान्ते च श्रूयमाणं पदं प्रत्येकमभिसम्बध्यते इति नियमेन मात्रशब्दस्य प्रत्येकं योगो भवति। अस्मिन् हि प्रातिपदिकार्थ इति सूत्रे प्रातिपदिकपदेन प्रातिपादकार्थे विवक्षिते प्रथमा साधुरित्यर्थस्तु नैव विवक्षितः सूत्रस्य वैयर्थ्यापत्तेः वैरूप्यापत्तेश्च। एवञ्च प्रातिपदिकार्थश्चैत्रादिरेव प्रथमार्थः। अस्मिन् सूत्रे न्यासकारेणेत्थं प्रतिपादितमस्ति यथा यत्रार्थान्तरनिरपेक्षा शब्दस्य प्रवृत्तिः सः सर्वः प्रातिपदिकार्थ इत्यस्मिन् विषये नागेशेन परमलघुमञ्जूषायामित्थमुक्तमस्ति यथा- सूत्रमते तु कर्तृकर्माद्यर्थकप्रत्ययेन कर्त्रादेरुक्तत्वात् प्रथमायाः प्रतिपदिकार्थश्च व्यक्तिरुपः।"[28]

एवञ्च प्रथमावाच्यः प्रातिपदिकार्थश्च व्यक्तिरूपः। तत्र गिरिधरभट्टाचार्यैः प्रतिपादितमपि वर्तते विषयोऽयं प्रातिपदिकार्थः सत्ता व्यक्तिरिति यावत् इत्यादिना। अत्रेयं शंका जागर्त्येषा तत्र हि घटो घट इत्यत्राभेदसम्बन्धेन बोधवारणाय अभेदसम्बन्धावचिछन्नतद्धर्मावच्छिन्नप्रकारता निरुपितविशेष्यतासम्बन्धेन शाब्दबुद्धित्वावच्छिन्नं प्रति तद्धर्मभेदः कारणमिति कार्यकारणभावः स्वीक्रियत इति घटो घट इत्यत्र अभेदसम्बन्धेन शाब्दबोधो न भवति। एवमेव तत्र चैत्रादिरूपोऽर्थः प्रकृतेरेवास्ति प्रथमार्थोऽपि यदि चैत्रादिरेव तदा भेदसम्बन्धस्याव्युत्पन्नत्वात् अभेदसम्बन्धस्य च पूर्वोक्तप्रकारेण बोधाजनकत्वात् कथं परस्परमन्वय इति। अस्याः शंकायाः निराकरणमित्थं क्रियते। प्रकृतिप्रत्ययार्थयोरभेदस्थले न प्रकृत्यर्थचैत्रादेः प्रथमार्थचैत्रादौ अन्वयोऽपितु तत्र प्रातिपदिके प्रथमार्थविशेषे तात्पर्यग्राहकमेव। प्रथमोपस्थापितस्तु चैत्रादिप्रातिपदिकार्थः तिङर्थकर्तर्यन्वेतीति बोध्यम् । स्तोकं पचतीत्यादौ स्तोकादीनामर्थस्य पाके न अभेदान्वयः। चैत्रपदोत्तरप्रथमायाः निरर्थकत्वस्य पाणिनिनये अस्वीकारात्। प्रथमायाः विभक्तिविषये आचार्यो नागेश इत्थं प्रतिपादयति वार्तिककारसम्मतं मतं यथा– तत्रोक्ते तु कारकमात्रे प्रथमैव तिङ्समानाधिकरणे प्रथमा अभिहिते प्रथमा इति वार्तिकद्वयात्।[29] इत्थञ्च कात्यायननये प्रथमायाः प्रातिपादिकार्थत्वे प्रातिपदिकस्य तात्पर्यग्राहकत्वमात्रकल्पनायां शाब्दबोधजनकत्वानुपपत्तिः अतोऽभिहितकारकत्वमेव प्रथमार्थ इति व्याख्यानं भवति । तथा च कर्तृत्वादिरुपे प्रथमार्थे रामादिप्रातिपदिकार्थो भेदसम्बन्धेन एवान्वेति । तत्र व्यापारान्वितस्य कर्तृत्वादिविषयकबोधस्य वैयर्थ्यापत्तिरित्यपि न शङ्कनीयम् रामत्वावच्छिन्नवृत्तित्वेन कर्तृत्वादेः तिङा अबोधितत्वात्। अत एवोक्तम् अभिधानं तु प्रायेण तिङ्कृत्तद्धितसमासैः क्वचिन्निपातेनाभिधानम्।अतः कर्तृत्वकर्मत्वाद्यभिधानम् निपाततिङ्कृत्तद्धितसमासैः सत्वात् प्रथमया न कर्तृत्वादिबोधः। अत एव प्रासाद आस्ते इत्यत्र धातूत्तरघञा अधिकरणत्वस्योक्तत्वेऽपि सप्तमीविभक्तेः न विरोधः। एवमेव पक्वं भुङ्क्ते" इत्यत्र क्तप्रत्ययेन कर्मोक्तेऽपि द्वितीयायाः न विरोधः।

यद्यपि कौमुदीकारेण अभिधानं तु प्रायेण तिङ्कृत्तद्धितसमासैः क्वचिन्निपातेनाभिधानम्" इत्युक्त्वा निपातेनापि कर्मत्वादीनामभिधानं भवतीति प्रतिपादितम् तथापि निपातेन कर्मत्वस्याभिधाने प्रमाणाभावात्तन्न समीचीनम् ।विषवृक्षोऽपि सम्वर्ध्य स्वयं छेत्तुमसाम्प्रतम् इत्यत्र तुमुनः सिद्ध्यर्थम् इष्यते इति क्रियाध्याहारस्यावश्यकत्वात्। इष्यते इति तिङैव कर्मत्वस्याभिधानमस्तीति प्रथमा भवति तत्र। अयं विषयो नागेशेन इत्थं प्रतिपादितः लघुब्देन्दुखरे यथा–

परे त्वत्र तुमुनः साधुत्वायेष्यते इत्यध्याहार आवश्यकः। अन्यथा क्रियार्थक्रियोपपदत्वाभावात् शकादिप्रयोगाभावाच्च स दुर्लभः स्यात्। अध्याहारे तु इच्छार्थेषु तुमुनिति सुलभः। विषवृक्षोऽपि सम्वर्ध्य छेत्तुमिष्यते इति यत् तदसाम्प्रतमन्यान्यम् इत्यर्थः। एवञ्चाध्याहृततिङा अभिधानान्न द्वितीया।[30] तत्र हि प्रासाद आस्ते पक्वं भुङ्क्ते इत्यादौ घञा क्तेन च अधिकरणत्वकर्मत्वयोरुक्तत्वेऽपि घञा सदिधातुनिरुपिताधिकरणत्वस्य क्तेन च पच्धातुनिरुपितकर्मत्वस्योक्तत्वात् क्रमशः आस्धातुनिरुपिताधिकरणत्वस्य च अनुक्तत्वात् तत्र सप्तमीद्वितीये भवत एव। यथा सुन्दरं बालकं पश्येत्यत्र विशेषणपदोत्तरविभक्त्या कर्मत्वस्योक्तत्वेऽपि विशेष्यवाचकात् अपि द्वितीया भवति तद्वदिह ज्ञेयम्।

इदमेवाभिप्रेत्य भाष्यकारेण द्वयोः क्रिययोरेकमेव कारकं तत्रान्यतरेण कारकस्योक्तत्वे विभक्तिर्न प्राप्नोतीति पूर्वपक्षमुपस्थाप्य भाष्ये इत्थं समाहितं दृश्यते यथा–

न वा एष दोषः किं कारणम् अन्यतरेणाभिधानात्। यतोऽनभिधानम् तदाश्रया सप्तमी भविष्यति।[31] एवञ्च अभिधायकानां परिगणनस्य नास्ति आवश्यकता । अत एव लघुशब्देन्दुशेखरे नागेशेन प्रतिपादितम् अस्ति। यथा अत एव परिगणनप्रत्याख्यानेऽपि न दोष इत्याहुः।[32] नागेशेन विरचितायां परमलघुमञ्जूषायामपि प्रथमा कर्तृकारकत्वेन विवक्ष्यते। कर्ता क्रियायां स्वातन्त्र्येण विवक्षितोऽर्थः। कर्तृत्वञ्च प्रकृतधातुवाच्यव्यापाराश्रयत्वम् तेन प्रयोज्यप्रयोजकानुक्तकर्तृणां सर्वेषां संग्रहः। माषेष्वश्वं बध्नाति इत्यत्र तु गलविलाधःसंयोगानुकूलव्यापाराश्रयत्वेन अश्वस्य कर्तृत्वेऽपि प्रकृतधातुवाच्ययापाराश्रयत्वाभावान्न कर्तृत्त्वापत्तिः। कर्तृसंज्ञाविधायकं सूत्रं यथा स्वतन्त्रः कर्ता

प्रथमाविभक्तिविधायकं सूत्रन्तु यथा प्रातिपदिकार्थलिंगपरिमाणवचनमात्रे प्रथमा यद्यपि कात्यायनोत्तरवर्तिवैयाकरणैरनावश्यकतया खण्डनं विहितं तथापि प्रथमाविभक्तिविधायके वार्तिके अत्र प्रदर्श्यते तिङ्समानाधिकरणे प्रथमा अभिहिते प्रथमा चेति द्वे कात्यायनाभिमते वार्तिके स्तः।

**सम्बोधनप्रथमा**

प्रातिपदिकार्थलिंगपरिमाणवचनाद्यतिरिक्ते संबोधनेऽपि प्रथमा भवति। सम्बोधने च" इति सूत्रेण सम्बोधने प्रथमा विधीयते। पूर्वस्मिन् सूत्रे मात्रग्रहणात् संबोधनाधिक्ये प्रथमा न प्राप्नोतीति सूत्रस्यास्य आरम्भो विहितः पाणिनिना। इह संबोधनं प्रकृत्यर्थं प्रति विशेष्यक्रियां प्रति विशेषणम्। तथा च व्रजानि देवदत्त इत्यादौ एकतिङ् वाक्यम् इति वाक्यत्वे सिद्धे आमन्त्रितस्य च[33] इति निघातो भवति । क्रियां प्रति अविशेषणत्वे तु भिन्नवाक्यत्वात् न एतत् सिद्ध्येत्। तत्र समानवाक्ये निघातयुष्मदादेशा वक्तव्याः इति वार्तिकस्य सत्वात्। अत एव खलु संबोधनपदं यच्च इत्यादयः संगच्छन्ते। अस्य सूत्रस्य भाष्यमपि नास्त्येव। सम्बोधने चेति सूत्रेण प्रथमाविधानात् सम्बोधनमेव सम्बोधनप्रथमाया अर्थः । सम्बोधनविषये नागेशो यथा-

सम्बोधनप्रथमार्थस्यापि अनुवाद्यत्वेनोद्देश्यतया युष्मदर्थाभेदेन विधेयक्रियायामन्वयात् क्रियाजनकत्वरुपकारकत्वम्। देवदत्त त्वं गच्छेत्यादौ अभिमुखीभवद्देवदत्ताभिन्न-युष्मदर्थोद्देश्यप्रवर्तनादिविषयो गमनमिति बोधः इति।[34] सम्बोधनञ्च क्रियासु अभिमुखीभावः। प्रयोक्तृवचनार्थग्रहणे सादरीभवनम्। तस्य व्यञ्जकञ्च मुखपरावृत्यादि। तस्य फलञ्च सम्बोध्यस्य प्रवृत्तिर्निवृत्तिर्वा। तस्मात् सम्बोधनविभक्तिः अनुवाद्यविषयैव सम्बोध्यता अवच्छेदकरुपेण सम्बोध्यस्य सिद्धिं विना तस्य अभिमुखीभावस्य असंभवात् । अत एवोक्तं भर्तृहरिणा-

सिद्धस्याभिमुखीभावमात्रं सम्बोधनं विदुः।
प्राप्ताभिमुखो ह्यर्थात्मा क्रियासु विनियुज्यते।।
सम्बोधनं न वाक्यार्थः इति वृद्धेभ्य आगमः।[35]

अत्र हि सिद्धस्येत्यनेन सम्बोधनस्यानुवाद्यत्वम्, विनियुज्यते इत्यनेन तस्य प्रवर्तनाविषये क्रियासम्बन्धः सूच्यते । एवञ्च सम्बोधनविभक्तेः अनुवाद्यतया अनुवाद्यस्य च विधेये एव अन्वयेन, विधेयता च क्रियानिष्ठेति सम्बोधनस्य क्रियायामेवमन्वयः तेन च तस्य कारकविभक्तित्वमपि सिद्ध्यति । अत एव पूर्वं नागेशेनाभिहितं संगच्छते सम्बोधन प्रथमार्थस्यापीति।" तथा च हे राम इत्यादि संबोधनप्रथमास्थले सम्बोधनस्य संख्याया इव प्रकृत्यर्थे रामादावाश्रयत्वसम्बन्धेनान्वयः। प्रकृत्यर्थस्य च स्वोद्देश्यकत्वसम्बन्धेन साक्षाद् विध्यर्थप्रवर्तनायामेव अन्वयः। तद्वारैव तद्विषयीभूतक्रियायाम् अन्वयस्य अंगीकारात्। परम्परया अन्वयस्वीकारादेव नामार्थधात्वर्थयोर्भेदेन साक्षादन्वयोऽव्युत्पन्नः इति व्युत्पत्तेरपि विरोधो न भवति। तादृशप्रवर्तनायाश्च विषयत्वसम्बन्धेन रक्षणादिक्रियायाम् अन्वयः । एवञ्च राम माम् पाहि" इत्यत्र अभिमुखीभवद्रामोद्देश्यकप्रवर्तनाविषयो मत्कर्मकरक्षणम् इति शाब्दबोधो भवति । एवञ्च देवदत्तः त्वं गच्छ" इत्यादौ अभिमुखीभवदद्देवदत्ताभिन्नयुष्मदर्थोद्देश्यप्रवर्तनादिविषयो गमनमिति बोधो भवति ।

तत्र हि सम्बोधनस्य क्रियायां प्रकारतयैवान्वयो भवति । अत एव प्रतिपादितम् अस्ति वाक्यपदीये भर्तृहरिणा यथा–

सम्बोधन पदं यच्च तत्क्रियायां विशेषणम्।
व्रजानि देवदत्तेति निघातोऽत्र तथा सति।।[36]

संबोधनं प्रकृत्यर्थं प्रति विशेष्यं क्रियां प्रति विशेषणं भवतीति पूर्वमेव प्रतिपादितम् । एवञ्च सा प्रकारता क्रियायां वैयधिकरण्येनैव अन्वेति । संबोधनस्य क्रियायां प्रकारतयैवान्वयो भवतीति धिया केचन सम्बोधनस्य अकारकत्वमस्तीति प्रतिपादयन्ति । परन्तु वैयाकरणनये धात्वर्थस्यैव क्रियात्वेन धात्वर्थमुख्यविशेष्यकशाब्दबोधस्यैव स्वीकारात् सर्वेषामेव कारकाणां क्रियायां प्रकारतयैवान्वयः। एवञ्च विशेषणत्वेन क्रियायामन्वयात् सम्बोधनस्य अकारकत्वस्वीकारे तु सर्वेषाम् कर्मादीनामपि अकारकत्वापत्तिर्भवति। अतः सम्बोधनस्यापि क्रियायां विशेषणतया वैयधिकरणेन अन्वयेऽपि कारकत्वं सुस्थिरमेव। सम्बोधनपदार्थविषये आचार्यो नागेशस्तु मुखपरावृत्यभिव्यङ्गये अभिमुखीभावमात्रं संबोधनमिति प्रतिपादयति । उक्तञ्च नागेशेन यथा-

सम्बोधनमभिमुखीकरणम्। तथा च राम मां पाहि इत्यत्र अभिमुखीभवनाश्रय रामोद्देश्यक प्रवर्तनाविषयो मत्कर्मकं त्वत्कर्तृकरक्षणमिति बोधः।[37] व्रजानि देवदत्त इत्यादौ तु जानीहि इति शेषो बोद्धव्यो भवति। एवञ्च एकतिङ् वाक्यम् इत्यस्य च श्रूयमाणैकतिङित्यर्थ इति दोषो न भवति। हे राजन् सार्वभौमो भव इत्यत्र सार्वभौमपदादपि संबोधने प्रथमा भवतु इति तु न शंकनीयम् मुखपरावृत्त्यभिव्यङ्ग्ये अभिमुखीभावमात्रस्य सम्यग्बोधनार्थकेन समुपसर्गपूर्वकेन संबोधनपदेन बोधनात्। श्रोतरि विशिष्य राजत्वादिना ज्ञाते सत्येव तं प्रति कश्चिदर्थो ज्ञापयितुं शक्यो नान्यथा। ततश्च संबोधनविभक्तिरियं मञ्जूषोक्तप्रकारेण अनुवाद्यविषया एव अस्ति न तु विधेयविषया इति सिद्ध्यति। तथा च सार्वभौमत्वस्य विधेयस्य इदानीमसिद्धत्वेन अनुवाद्यत्वाभावात् सार्वभौमपदात् न संबोधनविभक्तिः।

**प्रथमाविभक्तेः कारकत्वाकारकत्वविचार**

वैयाकरणाभिमतकारकपदार्थस्य कर्तृत्वस्य प्रथमाविभक्तेः संबोधनस्य चाध्ययनानन्तरं प्रथमायाः विभक्तेः कारकत्वमस्ति नास्तीति विचार्यते। तत्र हि पाणिनिप्रणीतेन प्रातिपदिकार्थलिंगपरिमाणवचनमात्रे प्रथमा[38] इत्यनेन सूत्रेण कृतायाः प्रथमायाः कारकत्वमस्तीति सर्वैरपि स्वीकृतं दृश्यते। अस्य सूत्रस्य प्रवृत्तिस्तु क्रियायोग एव भवति। तत्र नागेशेनेत्थं प्रतिपादितमस्ति यथा–

इदमपि सूत्रं क्रिययोग एव प्रवर्तते अन्ततो असितक्रियायाः सर्वत्र सत्वात्। आख्यातार्थकर्त्रादिना अभेदान्वयेन तद्वारा क्रिययोगो बोध्यः। प्रथमान्तर्थस्यापि क्रियाजनकत्वादस्याः कारकविभक्तित्वेन भाष्ये व्यवहारः इति।[39] एवञ्च चैत्रः मैत्र इत्यादौ यत्र काचित् क्रिया न दृश्यते तत्राप्यस्ति क्रियायाः आक्षेपो भवत्येव। सर्वं वाक्यं क्रियया परिसमाप्यते इति सिद्धान्तस्य स्वीकारात्। सर्वत्रैव अस्तिक्रियायाः समभिव्याहारात् केवलं चैत्रः मैत्रः इत्यादिप्रयोगस्थलेऽपि तिङभिहितकर्तृत्वेन सह प्रथमार्थकर्तृत्वस्य अभेदेन अन्वयो भवति। तद्वारा चास्यापि क्रियान्वयित्वं सम्भवति।अत एव तिङ्बोध्यकारकबोधकतारुपे तिङ्समानाधिकरणे प्रथमेत्यर्थकं कात्यायनप्रणीतं तिङ्समानाधिकरणे प्रथमेति" वार्तिकं युक्तियुक्तं दृश्यते।प्रथमायाः विभक्तेः कारकत्वस्वीकारविषये आचार्यस्य पतञ्जलेरपि अभिमतमस्तीति सहयुक्तेऽप्रधाने"[40] इति सूत्रस्थभाष्यस्य अध्ययनेन ज्ञायते । तथा चोक्तम्–

सहयुक्तेऽप्रधानवचनमनर्थकम्। किं कारणम् उपपदविभक्तेरपेक्षया कारकविभक्तेः बलीयस्त्वात्। अन्यत्रापि उपपदविभक्तेः कारकविभक्तिर्बलीयसी इति प्रथमा भवति"।[41] इत्थञ्च कारकविभक्तित्वेन प्रथमायाः विभक्तेः कारकत्वमस्तीति स्फुटमेव भवति । एतस्मिन् विषये आचार्येण नागेशेन स्वस्य परमलघुमञ्जूषायामित्थं प्रतिपादितमस्ति यथा

तस्य चाख्यातार्थ कर्त्रादिना अभेदान्वयेन प्रथमार्थस्य कारकत्वम्। अत एवाख्यातार्थकारकक्रियान्वयात् तदर्थस्य क्रियाजनकत्वाद् अस्याः कारकविभक्तित्वेन भाष्ये व्यवहारः " इति।[42]

तत्र प्रथमायाः विभक्तेः विषये प्रक्रियासर्वस्वग्रन्थे इत्थं प्रतिपादितम् प्रक्रियासर्वस्वकारेण आचार्येण यथा-

अव्ययेषु हि लिङ्गविहीनेषु स्वार्थमात्रके ।
प्रथमासिद्धयेत्राद्यमुक्तमुच्चैः शनैर्यथा।।
कृष्णश्रीज्ञानमित्यादौ स्वार्थलिङ्गमिहाधिकम्।
तेन तत्रापि सिद्ध्यर्थं लिंगमात्र इतीरितम्।।
प्रस्थाद्या मानपात्रार्थास्ते तत्परिमिते यदा ।
ब्रीह्यादिके प्रवर्तन्ते प्रस्थो ब्रीहिरसाविति ।।
तदा परिमितत्वाख्यो धर्मोस्ति स्वार्थतोऽधिकः ।
तत्रापि प्रथमासिद्धये परिमाणपदं विदुः ।।
तथाग्निविप्र इत्यग्नितुल्यता स्वार्थतोऽधिका ।
तेनार्थान्तरवृत्तीनां प्रथमात्रोपलक्ष्यते।। इति ।।[43]

इत्थञ्च प्रथमायाः विभक्तेः सर्वैरपि वैयाकरणैः कारकत्वं स्वीकृतमस्तीति नागेशेन तत्र स्वस्य ग्रन्थे प्रथमेत्यादितोऽस्याः (प्रथमायाः) कारकविभक्तित्वेन भाष्ये व्यवहार इति यत् प्रतिपादितं तत्सर्वमपि संगच्छते।

**संदर्भ सूची:**


1. पाणिनिसूत्रम् अष्टाध्यायी १.४.१४)
2. कौटिलीयम् अर्थशास्त्र पृ.सं. १२० )
3. पा.सू.अ.४.१.२)
4. पा. सू. अ. २.३.२)
5. पा. सू. अ. २.३.१८)
6. (भू. व्युत्पत्तिवादः दीपिका सहित) पं. ज्वाला प्रसाद गौड चौखम्बा भारती प्रकाशन वाराणसी १९८३, पृ.१५ ।
7. ((भू. व्युत्पत्तिवादः दीपिका सहित) पं. ज्वाला प्रसाद गौड चौखम्बा भारती प्रकाशन वाराणसी १९८३,पृ. १६ )
8. (पा.सू.अ. ४.१.१)
9. (प.ल.म.का.नि.१५४)
10. ( शब्दशक्तिप्रकाशिका श्लो. ६७)
11. (भट्टनागेश ल.श.शे.का.प्र.पृ.४३४)
12. पा.सू.अ. २.३.५०)
13. प.ल.म. कारकनिरुपणम् पृ.१८८)
14. (पा. सू अ. १.४.२३)
15. (प.ल. म. कारकनिरुपणम् पृ. १५३)
16. (पा.सू.अ.१.४.५४)
17. (महाभाष्यप्रदीप १.४.५४ पृ. २७७)
18. (प. ल. म. का.नि. पृ.१५४)
19. (ल. श..शे. का. प्र. पृ. ४७६,४७७) ।
20. (वाक्यपदीयम् ३ काण्डम् साधनसमुद्देशः कारिका १०१-१०२)
21. (परमलघुमञ्जूषा कारकनिरुपणं पृ.१५६)
22. (पा. सू.अ. १.४.५५)
23. (पा.सू.अ. ३.१.२६)
24. (पा.सू.अ.१.४.५२)
25. (वाक्यपदीयम् ३ काण्डम् साधनसमुद्देशः कारिका३७)
26. (वाक्यपदीयं ३ का. सा. का. १८)

27. (हरिनामामृतवृत्तिः)।
28. (प.ल.म. कारकप्रकरणम् . पृ.सं. १५६)
29. (प.ल.म. कारकप्रकरणम् पृ.सं. १५६)
30. (ल. श.श.का.प्र.पृ.४५२)
31. (महाभांष्यम् २.३.१पृ.४८४)
32. इति ल.श.शे. का.प्र. पृ.४५३)
33. (पा.सू.अ. ८.१.१९.)
34. (प.ल. म.कारकप्रकरणम् पृ.१५८ १५९)
35. (वा.प.३.का.सा. समु.१६३,१६४)।
36. (वा.प.३ का. साधनसमुद्देश पृ९२)
37. (ल.श.शे. का.प्र.४३१)
38. (पा.सू.अ. २.३.४६)
39. ल. श. शे. का. प्र.४१५,४१६)
40. (पा.सू. अ.२.३.१९)
41. (महाभाष्यम् २.३.१९)
42. (प. ल. म. कारकप्रकरणम् पृ.सं. १५६)
43. प्रक्रियासर्वस्वम् पृ.१११)